# શ્રીરામરક્ષાસ્તોત્રમ્

અતસી પુષ્પસઙ્કાશં પીતવાસ સમચ્યુતમ્ |
ધ્યાત્વા વૈ પુણ્ડરીકાક્ષં શ્રીરામં વિષ્ણુમવ્યયમ્ || ૧||
પાતુવો હૃદયં રામઃ શ્રીકણ્ઠઃ કણ્ઠમેવ ચ |
નાભિં પાતુ મખત્રાતા કટિં મે વિશ્વરક્ષકઃ || ૨||
કરૌ પાતુ દાશરથિઃ પાદૌ મે વિશ્વરૂપધૃક્ |
ચક્ષુષી પાતુ વૈ દેવ સીતાપતિરનુત્તમઃ || ૩||
શિખાં મે પાતુ વિશ્વાત્મા કર્ણૌ મે પાતુ કામદઃ |
પાર્શ્વયોસ્તુ સુરત્રાતા કાલકોટિ દુરાસદઃ || ૪||
અનન્તઃ સર્વદા પાતુ શરીરં વિશ્વનાયકઃ |
જિહ્વાં મે પાતુ પાપઘ્નો લોકશિક્ષાપ્રવર્ત્તકઃ || ૫||
રાઘવઃ પાતુ મે દન્તાન્ કેશાન્ રક્ષતુ કેશવઃ |
સક્થિની પાતુ મે દત્તવિજયોનામ વિશ્વસૃક્ || ૬||
એતાં રામબલોપેતાં રક્ષાં યો વૈ પુમાન્ પઠેત્ |
સચિરાયુઃ સુખી વિદ્વાન્ લભતે દિવ્યસમ્પદામ્ || ૭||
રક્ષાં કરોતિ ભૂતેભ્યઃ સદા રક્ષતુ વૈષ્ણવી |
રામેતિ રામભદ્રેતિ રામચન્દ્રેતિ યઃ સ્મરેત્ || ૮||
વિમુક્તઃ સ નરઃ પાપાન્ મુક્તિં પ્રાપ્નોતિ શાશ્વતીમ્ |
વસિષ્ઠેન ઇદં પ્રોક્તં ગુરવે વિષ્ણુરૂપિણે || ૯||
તતો મે બ્રહ્મણઃ પ્રાપ્તં મયોક્તં નારદં પ્રતિ |
નારદેન તુ ભૂર્લોકે પ્રાપિતં સુજનેષ્વિહ || ૧૦||
સુપ્ત્વા વાડથ ગૃહેવાપિ માર્ગે ગચ્છેત એવ વા |
યે પઠન્તિ નરશ્રેષ્ઠઃ તે નરાઃ પુણ્યભાગિનઃ || ૧૧|| (તે જ્ઞેયાઃ)
ઇતિ શ્રીપાદ્મેમહાપુરાણે શ્રીરામરક્ષાસ્તોત્રમ્